- Title – अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 8/16
- Lines-
- Size
- Substance Paper –
- Script Devanagari ✓
- Language – संस्कृत
- Period –
- Beginning – रितिसंक्षेप : लक्षणां तरमाहसा-
  ध्यवद् भिन्ने इति
- End – पर्वतादौ वर्तमानेषु ऊष्मासिद्धमित्यर्थः
- Colophon-
- Illustrations -
- Source -
- Subject - दर्शन
- Revisor -
- Author - अज्ञात
- Remarks- 8-16 -पृष्ठ उपलब्ध है।
  अपूर्ण है।

म॰

८ रितिसंक्षेपः लक्षणं तत्राह साध्यवद्भिन्नेति साध्यवद्भिन्नो यः साध्याभाववान्
तदवृत्तित्वमित्यर्थः कपिसंयोगी एतद्वृक्षत्वादित्यव्याप्यवृत्तिसाध्यकाव्या
प्तिवारणाय साध्यवद्भिन्नेति साध्याभाववतो विशेषणमिति प्रांचः तन्न सा
साध्याभाववदित्यस्य व्यर्थत्वापत्तेः साध्यवद्भिन्नावृत्तित्वस्यैवानतिप्र (1)
षक्तत्वात् न चास्तु साध्यवद्भिन्ने साध्याभाववत्साध्यवद्भिन्नसाध्याभा
प वः तदवृत्तित्वमिति तत्र प्रतीतावुभयोरुत्तरं मतुप्प्रत्ययपलप्याच साध्यव
द्भिन्नवृत्तिर्यः साध्याभावः तदवृत्तित्वमित्यर्थः एवं च साध्यवद्भिन्न
उ वृत्तीत्युक्ते संयोगी द्रव्यत्वादित्यादावव्याप्तिः संयोगाभाववति द्रव्ये
द्रव्यत्वस्य वृत्तेः तदुपादाने च संयोगवद्भिन्नवृत्तिसंयोगाभावो गुणा
दिवृत्तिसंयोगाभाव एवमधिकरणभेदेनाभावभेदात्तदवृत्तित्वान्ना
व्याप्तिः न च तथापि साध्यवद्भिन्नावृत्तित्वमेवास्तु किं साध्याभाववदित्य
नेनेति वाच्यं पर्यायोक्तलक्षणेऽस्याप्रवेशेन वैयर्थ्याभावात् तस्यापि ल

८

दि

कांतमात्रेपतादृशविशेषणमनुपादेयमेव तदुपादाने हेतुतावच्छेदकभेदेन कार्य्य
कारणभेदापत्तेः हेतुतावच्छेदकसंबंधेन संबंधित्वे सतीत्यनेनापि विशेषणेन
वह्निमान्गगनादित्यादौनातिव्याप्तिः केचित्तु निरुक्तसाध्याभाववत्त्वविशिष्ट
निरूपितताया विशेषणताविशेषसंबंधेन तथोक्तसम्बन्धेन वा निरवच्छि
न्नाधिकरणतानिरूपितवर्त्तमानं हेतुतावच्छेदकसंबंधावच्छिन्ना-
धेयत्वं वाच्छिन्नाधिकरणत्वं तद्वत्वं विवक्षितम् धूमवान्वह्नेरित्यादौ पर्व
तोनिरवच्छिन्नाधिकरणताव्यक्तेः धूमाभावाधिकरणत्वात्तथापि अयोगोल
कनिरवच्छिन्नाधिकरणताव्यक्तेस्तथात्वान्नातिव्याप्तिरित्याहुः अन्येतु हेतु
तावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नत्वाधिकरणतात्रयव
तिपन्निरवच्छिन्नाधिकरणत्वं तदवृत्ति निरुक्तसाध्याभाववत्त्वविशिष्टनि
रूपितत्पर्य्याप्तसंबंधावच्छिन्नाधिकरणतात्वकत्वमिति विशेषणविशे
ष्यभाववत्त्व त्याशितात्पर्य्यात् स्वपदं हेतुपरं इत्यन्ये कपिसंयोगाभाव
वान्सत्वात् कपिसंयोगी गुणत्वादित्यादौ वपिना व्याप्तिरित्याहुः

म॰

९ क॰ नामतेनैवैतल्लक्षणकारणात् तथा चाधिकरणभेदेनाभावभेदात्साध्य
वद्भिन्ने घटे वर्त्तमानस्य साध्याभावस्य प्रतियोगिव्यधिकरणस्य प्र
तियोगिसमानाधिकरणस्यासत्त्वादव्याप्तेरभावात् न चैवं साध्याभावेत्यत्र
साध्यपदवैयर्थ्यं स्वाभावाभावस्यातिरिक्तत्वेन द्रव्यत्वादेरभावत्वा ३
भावात् साध्यवद्भिन्नवृत्ति घटत्वाभावादेर्हेतुमति सत्त्वात् व्यधिकरण
भेदेनाभावभेदादिति वाच्यं घटत्वप्रतियोगित्वानाधिकरणत्वप्रति ए
योगिव्यधिकरणत्वलक्षणविरुद्धधर्म्माध्यासत्वेनैवाधिकरणभेदेना ए
भावभेदाभ्युपगमात् न तु सर्व्वत्र तथा च साध्यवद्भिन्नवृत्तिघटाभा त्वा
वादेर्हेतुमति सत्त्वात् असम्भववारणाय साध्यपदोपादानात् एवं रम
९

लक्षणान्तरत्वात् न च तत्रापि साध्यवह्निमन्निरूपितहेतुवृत्तित्वमित्येवास्तु किं
पितर साध्याभावपदेनेति वाच्यम् हेतोस्तादृशद्रव्यत्वादिमद्वृत्तित्वादसंभवापत्तेः वा
साध्याभाववेत्यत्र साध्यपदं नैव ये वेद द्रव्यत्वादेरपि द्रव्यत्वाभावाभाव
त्वात् भावरूपाभावत्वस्य आधिकरणभेदेन भेदाभावात् हेतोस्तद्वृत्ति धूमस्य
त्वे नासंभवतादवस्थ्यात् न तु तत्रापि घटत्व घटाकाशसंयोगान्य
ण तराभावव गगनत्वादित्यत्र घटापकरदेशावच्छेदेन घटाकाशसंयोगा पा श
भावस्यागगने सत्त्वात् सद्धेतुतया ऽव्याप्तिः साध्यवह्निमेघघटे वर्तमान
[illegible]
[illegible] गगने सत्त्वात् [illegible]
नचसाध्यवह्निमन्निवृत्तित्वविशिष्टसाध्याभाववत्त्वं विवक्षितमि
तिवाच्यम् साध्याभावपदवैयर्थ्यापत्तेः साध्यवह्निमन्निवृत्तित्व
विशिष्टवदवृत्तित्वस्यैव सम्यक्त्वादिति चेन्न अभावाभावस्यातिरि

प्र॰ १॰ लभ्यमिति चेन्न वह्न्यभावात् केवलान्वयिन्यव्याप्तिवदस्यापि दोषत्वान्न च तत्प्रा
पि साध्यवत्प्रतियोगिकान्योन्याभावमात्रस्यैव तल्लक्षणघटकत्वे वक्ष्यमा
ण केवलान्वयिन्यप्रसिद्धिरूपात् केवलान्वयिसाध्यकेपि साध्याधिकरणी
भूततत्तद्व्यक्तित्वावच्छिन्नान्योन्याभावस्याप्रसिद्धत्वादिति वाच्यम् तत्ताद
शान्योन्याभावस्याप्रसिद्धत्वेपि तद्धितिहेतौ दर्जरे वाव्याप्तेर्दुर्वारत्वात्
पर्वतसाध्यवत्प्रतियोगिकान्योन्याभावपदेन साध्यवत्त्वावच्छिन्नप्रति
योगिताकान्योन्याभाव एव विवक्षितः न चैवं पंचमाभेदस्तत्र सा
ध्यवत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वेन प्रवेशोऽननुगता
दृशान्योन्याभावाधिकरणत्वेनेत्यधिकरणत्वा प्रवे
शापूर्वेशाप्यामेव भेदात् प्रथमं वऽभावघटकतयानाधिकरणत्वांश
पि स्यैव वैयर्थ्यमिति तिनकौ दोष इति दिक् ॥ सकलेति साकल्यसाध्याभाववतो विशेष

घटाकाशसंयोगघटत्वान्यतराभावाभावोऽतिरिक्तः आकाशसंयोगप
न टत्वादीनामननुगतत्वात्तस्याननुगमशक्यत्वात् घटत्वद्रव्यत्वाद्यभावा
ति भावस्तु नातिरिक्तः घटत्वद्रव्यत्वादीनामननुगतत्वात् तस्याश्च द्रव्यत्वमादा
यासं[illegible]भववारणायैव साध्यपदमिति माथुरीत्यालोकाविस्तरः साध्य
वत्प्रतियोगिताकान्योन्याभावेति हेतौ साध्यवत्प्रतियोगिकान्यो
न्याभावाधिकरणवृत्तित्वाभावइत्यर्थः अन्योन्याभावश्च प्रति
योगि[illegible]वृत्तित्वेन विशेषणीयः तेन साध्यवति व्याप्तस्य [illegible]
[illegible]वृत्ति धर्मावच्छिन्नप्रतियोगिताकभेदवति हेतौ वृत्तावपि नासत्त्व
वः नन्वेवमपि नानाधिकरणकसाध्यके वह्निमान् धूमादित्यादौ सा
ध्याधिकरणीभूततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकान्योन्याभाव
वतिहेतौ वृत्तेरव्याप्तिरिदं वारा प्रतियोगि[illegible]त्वमपहाय साध्यव
त्त्वावच्छिन्नप्रतियोगिताकान्योन्याभावविवक्षणे तु पंचमेन सहपौन

म. यापर्वतादावपि वन्ह्यादेर्जैह्रोधाभावादिसत्वेन समवायादिसंबंधावच्छि
११ न्नप्रतियोगिताकवन्ह्यादिसामान्याभावसत्वेन च यावदंतर्गततया त
न्निष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् धूमत्वस्याऽसंभवः स्यात्
न च कपिसंयोगी एतद्वृक्षत्वादित्यादौ वृक्षस्यापि तादृशाभाववत्वेन या व
वदंतर्गततया तन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन एतद्वृक्षत्वस्य
स्याव्याप्तिरिति वाच्यम् किंचिदनवच्छिन्नायाः साध्याभावाधिक
रणतायाः विवक्षितत्वात् इष्टं च किंचिदनवच्छिन्नायाः कपिसंयोगा
भावाधिकरणताया गुणादावेव सत्वेन तत्र च हेतोरप्यभावसत्वात् ना
व्याप्तिः न च कपिसंयोगाभाववान् सत्वादित्यादौ साध्याभावस्य क
पिसंयोगादेर्निरवच्छिन्नाधिकरणत्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम् के

तथा च यावंति साध्याभावाधिकरणानि तन्निष्ठाभावप्रतियोगित्वं हेतोर्व्या ८
प्तिरित्यर्थः धूमाद्यभाववद्ध्रदादिनिष्ठाभावप्रतियोगित्वात् वह्न्यादावति
व्याप्तिरिति यावदिति साध्याभाववत्ताविशेषणम् साध्याभावविशेष(
त णत्वे तत्तद्ध्रदावृत्तित्वादिरूपेण यो वह्न्याद्यभाववत्स्वव्यापि सकलसा
ध्याभाववन्मध्ये प्रवेशेन तावदधिकरणाप्रसिद्ध्याऽसंभवापत्तेः न च द्रव्यं
सत्वादित्यादौ द्रव्यत्वाभाववति गुणादौ सत्तादेर्विशिष्टसत्वादिनाभा
वसत्वादतिव्याप्तिरिति वाच्यम् तादृशाभावप्रतियोगितावच्छेदकहेतुता
वच्छेदकवत्त्वस्येह विवक्षितत्वात् प्रतियोगिता च हेतुतावच्छेदकसंबंधा
वच्छिन्ना ग्राह्या तेन द्रव्यत्वाभाववति गुणादौ सत्तादेः संयोगादिसंबंधा
वच्छिन्नाभावसत्त्वेपि नातिव्याप्तिः साध्याभावश्च साध्यतावच्छेदका
वच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताको बोध्यः अत्र

म. वानुपपत्तेरिति कपिसंयोगवद्भिन्नत्वाभाववत्त्वापत्तिर्वह्निर्न वृत्तिम
१२ त्वात् वह्नित्वानुकूलपदमग्राह्योपपदमेव तत्त्वाभाववतान्यत्वादित्या
दौ केवलव्यतिरेकिण्यपि हेतौ केवलसाध्याभावाधिकरणत्वाप्रसिद्ध्यावत्वाप्रसिद्ध्याऽव्या
च प्त्यापत्तेः तत्त्वाव्याप्तिविशिष्टवह्न्यभावनिरूपितसाध्याभावाधिकरणता
व्यापकीभूतो योऽभावः हेतुतावच्छेदकसंबंधावच्छिन्नतत्प्रतियोगिताव
च्छेदकहेतुतावच्छेदकवाचित्वमर्थः तत्त्वसत्तादिसामान्याभावाप्रसिद्ध्याऽव्याप्ति
मेयत्वादिना निरूपितसाध्याभावाधिकरणतानिरूपकत्वात् द्रव्यसत्त्वादि
व्याप्यवति व्याप्तिः तद्भिन्नवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वं व्या
पकत्वमित्युक्तौ निर्धूमत्ववान् वह्निमत्त्वादित्यादावव्याप्तिः निर्वह्नित्वा
भावानां वह्निव्यक्तीनां सर्वासामेव वारनिति न्यायेन निर्धूमत्वाभावाधि
करणतावच्छिन्नप्रकारान्योन्याभावप्रतियोगितावच्छेदकत्वादिति वाच्यम् एन

सत्ताभाववदन्योन्याभाव

लाच्च भिन्नभावादित्यनेन ग्रंथकृतैव एतद्दोषस्य वक्ष्यमाणत्वात्
न च पृथिवीकपिसंयोगादिम्यादौ पृथिवीत्वाभाववति पाकत्वेपि च कपिसं
योगाभावसत्वादतिव्याप्तिरिति वाच्यम् तन्निरूपकत्वे तत्र निरवच्छिन्नव 6
त्तित्वस्य विवक्षितत्वात् इदं च पृथिवीत्वाभावाधिकरणे जलादौ पा
कद्वृत्तगते निरवच्छिन्नवृत्तिमानभावो न कपिसंयोगाभावः किंतु घ
टत्वाद्यभावस्तत्प्रतियोगित्वस्य हेतावसत्वान्नातिव्याप्तिः नचैवम
न्योन्याभावस्य व्याप्यवृत्तितानियमेन पेद्रव्यत्वाभाववान् संयोगव कपि
द्भिन्नत्वात् इत्यादावपि सद्धेतुतया तत्र व्याप्तिः कपिसंयोगवद्भिन्नत्वा
भावस्य संयोगस्य निरवच्छिन्नवृत्तेरप्रसिद्धेरिति वाच्यम् अन्योन्याभा
वस्य व्याप्यवृत्तितानियमेऽन्योन्याभावस्याभावो न प्रतियोगितावच्छेदकस्व
रूपः किंतु तिरिक्तो व्याप्यवृत्तिः अन्यथा मूलावच्छेदेन कपिसंभेदाभा
योगे

नं· स्यच हेतौ सत्वे पिनातिव्याप्तिः साध्यवदन्यत्वं चान्योन्याभावत्वनिरू
१३ पितसाध्यवत्तावच्छिन्ननिरूपितप्रतियोगिताकाभाववत्त्वम् तेन वन्हि
म मान्धूमादित्यादौ तेन वन्हिंदन्यत्वसिन्धूमादेर्वृत्तावपिनाव्याप्तिः नवा (भिन्न
[illegible] वन्ह्यवच्छिन्नप्रतियोगिताकान्योन्याभावस्य स्वावच्छिन्नभेदरूपस्या
धिकरणे पर्वतादौ धूमस्य वृत्तावपिनाव्याप्तिः तस्य साध्यवत्तावच्छि
न्नप्रतियोगिताकात्यन्ताभावत्वनिरूपितत्वेनान्योन्याभावत्वनि ॥
रूपितत्वविरहात् अन्योन्याभावत्वनिरूपितत्वं च तादात्म्यसंबं (
धावच्छिन्नत्वमेव साध्यवत्वं च साध्यतावच्छेदकसंबंधेन बोध्यम् ते
नवन्हिमान्धूमादित्यादौ [illegible] वन्हिमत्त्वावच्छिन्नप्रतियोगिताकस्य
समवायेन वन्हिमतोन्योन्याभावस्याधिकरणे पर्वतादौ धूमादेर्व (त्ताम
त्तावपिनाव्याप्तिः सर्वमन्यत्स्वयमनल्पालोकादिणावसेयम् [illegible]

तादृशसाध्याधिकरणोलव्यापकतानवच्छेदकं हेतुतावच्छेदकसंबंधावच्छिन्नयद्धर्मा
वच्छिन्नाभाववत्त्वम् तद्धर्मवत्त्वस्य विवक्षितत्वात् व्यापकतावच्छेदकत्वं तत
न्निष्ठात्यंताभावप्रतियोगितानवच्छेदकत्वं न तु तादृशनिष्ठाभावप्रतियोगिताव्यधि(
करणाभावप्रतियोगितानवच्छेदकत्वम् तद्वृत्तित्वनिवेशितव्यर्थत्वान्यो(
भाववत्त्वप्रतियो गितानवच्छेदकत्वं व्यापकतव्यापकतायां प्रतियोगि(
वैयधिकरण्यस्य निवेशितत्वस्य चाप्रमेयप्रयोजनविरहात् तेन पृथिवी(
कपिसंयोगादित्यादौ नातिव्याप्तिः कपिसंयोगाभाववत्त्वस्य निरुक्तव्या
पकतानवच्छेदकत्वविरहादित्येव यथमोध्यः साध्यवदन्येति न्यत्राप्र
यमनसत्तो ... हेतोः साध्यवदन्यवृत्तित्वाभाववद्वृत्त्यर्थः तादृशावृत्ति
त्वाभावश्च तादृशवृत्तित्वसामान्याभावो ग्राह्यः तेन धूमवान्वह्नेरित्यादौ धू
मजह्रदस्य जलह्रदादिवृत्तित्वाभावस्य तादृशावृत्तित्वजन्यो भपा भाव
ल१

७
म.
१४ यसाध्याभाववदवृत्तित्वं वक्तव्यम् एवं च वह्नेर्विशिष्टाधिकरणताभाव
त्वाव्याप्तिरिति वाच्यम् साध्यवत्पदवैयर्थ्यापत्तेः साध्यवद्भिन्नवृत्तित्ववि त्व
शिष्टवदवृत्तित्वस्यैव सम्यक्त्वात् सर्वेषां हेत्वधिकरणे विशिष्टाधिक
रणताभावादेरसंभवाभावात् तृतीये साध्यवत्प्रतियोगिकान्योन्याभावासा
वमात्रस्य लक्षणघटकत्वे चालिनीन्यायेनान्योन्याभावमादाय नानाधि 13
करणकसाध्यके वह्निमान्धूमादित्यादावव्याप्तिश्चेत्तर्पि इष्टम् श्री०
नापीति अत्र साध्यासामानाधिकरण्यं न साध्याधिकरणावृत्तित्वाभा
वः द्रव्यं सत्त्वादित्यादावतिव्याप्त्यापत्तेः सत्ताया द्रव्यत्वाधिकरणवृत्ति
त्वाभावानधिकरणत्वात् नापि साध्यवद्भिन्नवृत्तित्वं द्वितीयेन पौन
रुक्त्यापत्तेः किंतु साध्याधिकरणत्वाभाववद्वृत्तित्वं तदनधिकरणत्वं
तद्भिन्नत्वम् अधिकरणत्वप्रवेशप्रयोजनविरहात् तथा च साध्या

यथा तत्तीयलक्षणे भेदः तथोक्तं तत्रैवेति [illegible] सर्वोऽपि वलक्षणानि 14
केवलान्वयव्याप्यावृत्तिपि पंचानामेव लक्षणानामिदं वाच्यं न्नेयत्वा
दित्यादि व्याप्यवृत्ति केवलान्वयिसाध्यके [illegible] भावात् इत्यर्थः साध्य
तावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छिन्नसाध्याभावस्य सा
ध्यतावच्छेदकसंबंधेन साध्यवत्तावच्छिन्नप्रतियोगिताकान्योन्याभाव
स्य वा प्रसिद्धत्वात् कपिसंयोगाभाववान्सत्त्वादित्यादौ निरवच्छिन्नसा
ध्याभावाधिकरणत्वस्याप्रसिद्धत्वाच्चेति भावः ततीयलक्षणस्य के
वलान्वयिसाध्यकासत्त्वं च तथाव्याप्तावसरे एव प्रपंचितम् एतच्चो
पलक्षणम् क्षितीयकपिसंयोगोपेतद्यत्त्वादित्यादावव्याप्तिः अधि
करणभेदेनाभावभेदमानाभावे कपिसंयोगवदन्यवृत्तिकपिसंयो
गाभाव एव तद्घटत्वादेस्तद्घटत्वस्य न तु साध्यवदन्यवृत्तित्वविशि

म. नद्यातिः न चैवं सत्तावान् जातेरित्यादावव्याप्तिः सत्ताधिकरणत्वाभाववति सामान्यादौ हेतुसत्त्वा
वच्छेदकसमवायेन वृत्तेरप्रसिद्धेरिति वाच्यम् तादृशसाध्याधिकरणत्वाभावव्यापका
स्प न्योन्याभावप्रतियोगितावच्छेदकत्वस्य निरुक्तैव विवक्षितत्वात् तत्र साध्याधिकरणत्वाभावस
मानाधिकरण्यं तु धूमवान् वह्नेरित्यादौ धूमाधिकरणत्वाभाव
वति जलह्रदादौ वह्निमदन्योन्याभावसत्त्वादतिव्याप्तिरिति व्यापकत्वानुधावनम्
अन्योन्याभावप्रतियोगितावच्छेदकत्वं हेतुतावच्छेदकसंबं
धावच्छिन्नहेतुतावच्छेदकावच्छिन्नं ग्राह्यम् अन्यथा वह्निमान् धूमादित्यादौ जलसं
धिकरणत्वाभाववति धूमावयवे धूमवदन्योन्याभावसत्त्वात् अव्याप्तिः स्यात्
स्याच्च द्रव्यं जातेरित्यादौ घटत्वपटत्वादिरूपतत्तज्जातिमतोऽन्योन्याभावस्य
द्रव्यत्वाधिकरणत्वाभावव्यापकत्वेऽपि नातिव्याप्तिः अव्याप्यवृत्तिमतोऽन्यो
भावस्तु अव्याप्यवृत्तिरिति साध्यवैयधिकरण्येति साध्यवैयधिकरण्यं सा
ध्यवद्भिन्नवृत्तित्वं साध्यवदवृत्तित्वपरत्वे द्रव्यं सत्त्वादित्यादावतिव्या
प्तिः अव्याप्यवृत्तिमतोऽन्योन्याभावस्तु नाव्याप्यवृत्तिरिति अव्याप्यवृत्तिसाध्यक
पक्षे तौ नाव्याप्तिः अधिकरणत्वमित्यत्राधिकरणत्वं ग्राह्यसाधिकस्य प्रवेशात्
तु न साध्यवदन्यावृत्तित्वमि

न च साध्याधिकरणत्वाभावव्यापकाभावप्रतियोगीत्वमेवास्त्विति वाच्यं तथा सति पृथिवीकपि

धिकरणत्वाभाववद्वृत्तिभिन्नत्वं हेतावव्यभिचारितत्वमिति फलितम् अव्या 16
प्यवृत्तिसाध्यकसद्धेतावव्याप्तिवारणायाधिकरणत्वमवच्छेद्यं: अव्याप्यवृ
त्तेराधिकरणतानिव्याप्यवृत्तिः साध्याधिकरणत्वं च साध्यतावच्छेदकाव
च्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नं ग्राह्यम् अन्यथा गुणकर्मान्य
त्वविशिष्टसत्तावान् जातेरित्यादौ सत्ताया एव साध्यत्वेन साध्याधिकर
णत्वाभाववत्सामान्यायेवतद्वृत्तित्वाज्जातेरतिव्याप्तिः स्यात् स्याच्च
न समवायेन वह्न्यादौ साध्ये संयोगेन धूमादिहेतावतिव्याप्तिः वँह्न्यधिकर
णत्वाभाववज्जलहृदादेवतद्वृत्तित्वाद्धूमादेः इत्थं च साध्यतावच्छेदक
समवायसंबंधावच्छिन्नवह्न्यधिकरणत्वाभाववान् पर्वतोपि धूमस्य त
द्वृत्तित्वान्नातिव्याप्तिः वृत्तिश्च हेतुतावच्छेदकसंबंधेन बोध्या तेन नताद
शावह्न्यधिकरणत्वाभाववति धूमावयवे समवायेन धूमस्य वृत्तावपि
संयोगेन५ राम

६
म:
१६

र्थकत्वकारणत्वे केवलान्वयित्वभ्रमस्तस्य: तथा च व्यापकाभावाप्रव्यभूतं तदु
भयवत्त्वज्ञानमपि तदुभयवत्त्वापसिद्धमिति भावः: सा ध्यानत्वविकल्पानत्वविकल्पात्वं च
प्रत्याप्रभूतं तु न संभवेत मयो कल्पतामद्वयत्वं तत्त्वरूपत्वाभावादिति ध्येयम्
माथुरीसमाप्ता।

ताम
१६

व्याप्ता

एतेनैव पक्षाश्रुतस्वयोनहत्वम अवच्छेदकाभावप्रकतका नाधिकरणत्वांशस्येप
र्वतस्य साध्यवह्निमत्वं च साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकावच्छि
न्न प्रतियोगितावच्छेदकताकभेदवत्त्वं तेन वह्निमान्धूमादित्यादौ धूमस्य सम
वायेन वह्निमतो भिन्ने किंचित्साध्यवह्निन्ने च पर्वतादौ च सत्वेपि न क्षतिः
तादृशसाध्यवह्निनत्वव्यापकान्योन्याभावप्रतियोगितावच्छेदकत्वमितिगु
वत समुदायार्थनिष्कर्षः अन्यथापूर्वसाध्यभिन्नवृत्तिकत्वमित्यत्र वृत्तेर्हेतुतावच्छे
दकसंबंधेनैव वाच्यतया सत्तावान्द्रव्यत्वादित्यादौ व्याप्तिभ्रमापत्तेः शेषं पूर्ववत्
लक्षणद्वयमेकदेव दूषयति तदुभयमपीति साध्यानधिकरणानधिकरणत्वस्य
साध्यानधिकरणानधिकरणत्वनियतत्वात् साध्यानधिकरणावृत्तित्वव्याप्य
मितिपावत् तच्चव्यापकीभूतं साध्यानधिकरणावृत्तित्वं च तत्र केवलान्वयिसा
ध्यकेऽप्रसिद्धमित्यन्वयः साध्यानधिकरणत्वस्य साध्याधिकरणत्वावच्छिन्न
प्रतियोगिताकभेदवत्त्वस्य तत्राप्रसिद्धेः यदि च साध्यानधिकरणो
भेदः किंतु साध्याधिकरणप्रतियोगिकभेदवत्त्वमात्रं तदा वह्निमान्धूमादित्यादौ
यत्किंचिद्वह्न्यधिकरणाभिन्ने पर्वतादौ वर्तमाने धूमेऽव्याप्तिरित्यर्थः साध्य
त्वं नतद्वत्ता